# संस्कृत-वार्ता:

दिनाङ्क :.07.01.2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- भारत-इस्राइल-देशौ आतंकवादं विरुध्य शून्य -सहिष्णुतां प्रकटितवन्तौ। प्रधानमन्त्री नरेन्द्र-मोदी अद्य इस्राइल-देशस्य प्रधानमन्त्रिणा बेन्यामिन-नेतन्याहू वर्येण सह दूरभाषे संवादम् अकरोत्।
- विदेशमन्त्रिणा डॉ. एस् जयशङ्करेण आतङ्कवादिभ्यः प्रशिक्षण-प्रदानाय दशकेभ्यः शिविर-सञ्चालनाय च पाकिस्तानस्य आलोचना कृता।
- छत्तीसगढस्य सुकमा-जनपदे अद्य षड्विंशति-नक्सलवादिभिः आत्मसमर्णं कृतम्।
- दिल्ली-आरक्षिबलेन गतरात्रौ दिल्ल्यां रामलीला मैदान-क्षेत्रं निकषा अवैधनिर्माणं विरुध्य प्राथमिकी पंजीकृत्य पञ्च जनाः निगृहीताः। घटनायां पञ्च आरक्षिण: अपि
- व्रणिता:।
- आई सी सी इति अन्ताराष्ट्रिय-क्रिकेट्-परिषदा ऐषमः विंशतिं प्रतिविंशतिः विश्वचषक-स्पर्धायाः अन्यत्र आयोजन-सम्बद्धा बाङ्ग्लादेशस्य प्रार्थना निराकृता ।
- बैडमिण्टन-स्पर्धायां पी. वी. सिन्धुः मलेशिया-ओपन-क्रीडायाः प्रप्रागुपानन्त्य-चक्रे प्रविष्टा ।

-------------------------------------------

<u>प्रधानमन्त्री नेतन्याहू</u>

प्रधानमन्त्री नरेन्द्र-मोदी अद्य इस्राइल-देशस्य प्रधानमन्त्रिणा बेन्यामिन नेतन्याहू वर्येण सह दूरभाषे संवादम् अकरोत्। तेन भारत-इस्राइलदेशयोः रणनीतिक-सहभागितायाः दृढीकरणाय चर्चा कृता। उभाभ्यां नेतृभ्यां लोकतान्त्रिक-मूल्यानां परस्पर-विश्वासस्य दूरदर्शि-दृष्टिकोणस्य च आधारे भारत-इस्राइल-रणनीतिक-सहभागितां द्रढयितुं प्राथमिकताः अभिज्ञाताः। उभाभ्याम् आतङ्कवादस्य सर्वाणि रूपाणि अभिव्यक्तियश्च कथमपि न सोढुं स्वीयं दृष्टिकोणं पुनः प्रकटितम्। आतङ्कवादं निराकर्तुं च प्रतिबद्धतायाः पुष्टिः कृता। उभाभ्यां नेतृभ्यां परस्परं नव-वर्षस्य शुभकामनाः प्रदत्ताः। देशद्वयस्य नागरिकेभ्यः शान्तेः समृद्धेश्च कामना कृता।

---------------------------------------------

## जयशङ्करः लक्ज़मबर्ग

विदेशमन्त्रिणा डॉ. एस् जयशङ्करेण आतङ्कवादिभ्यः प्रशिक्षण-प्रदानाय दशकेभ्यः शिविर-सञ्चालनाय च पाकिस्तानस्य आलोचना कृता। विदेशमन्त्री अवोचत् यत् वैश्विकपरिदृश्ये कूटिनीतिक-स्थितौ भारतस्य सम्बन्धाः पाकिस्तानेन सह तस्यातङ्कवादाय समर्थन-कारणेन यथावत् प्रवर्तिष्यन्ते। अमुना एतत् वक्तव्यम् अद्य लक्ज़मबर्ग नगरे भारतीय-समुदायेन सह संवादे प्रदत्तम्। तेनोक्तं यत् जगति कोपि देशः प्रतिवेशिभिः सह तादृशः व्यवहारः न करोति यादृशो व्यवहारः पाकिस्तानेन क्रियते।

डॉ. एस् जयशङ्करः सबलं प्रत्यपादयत् यत् भारतं प्रतिवेशिभिः सह तेषां नीतिनामनुणं व्यवहारं करिष्यति। पाकिस्तानं विरुध्य सिन्दूराभियानविषये विदेशमन्त्रिणा यूरोपीयदेशानां प्रतिक्रियाः अपि उल्लेखिताः।

वेनेजुएला देशे अमेरिकीय-सैन्य-कार्याचरण-विषये विदेशमन्त्रिणा चिन्ता प्रकटिता। अमुना तत्रत्य जनानां सुरक्षा कल्याणं च अध्यर्थितॆ।

विदेशमन्त्री अवोचत् यत् अस्मिन् वर्षे यूरोपीय-देशैः सह भारतस्य सम्बन्धेषु परिष्कारो भविष्यति। विदेशमन्त्रिणा यूरोपीय-देशैः सह सम्बन्ध-सुदृढीकरणाय भारतीय-प्रवासिनां भूमिका श्लाघिता। तेन भारत-लक्जमबर्गयोः राजनीतिक-व्यापारिक-प्रौद्योगिक-क्षेत्रेषु महत्त्वपूर्ण-सम्बन्धाः अपि प्रकाशिताः।

---------------------------------------------

## छत्तीसगढे नक्सलात्मसमर्पणम्

छत्तीसगढस्य सुकमा-जनपदे अद्य षड्विंशति-नक्सलवादिभिः आत्मसमर्णं कृतम्। एतेषु त्रयोदश-नक्सलवादिषु षड्त्रिंशल्लक्ष-रूप्यकाणां पुरस्कारः आसीत्। आरक्ष्यधीक्षकस्य किरण-चव्हाणस्य अनुसारं सप्त महिलाः समेत्य एतैः नक्सलवादिभिः पूना मार्गेम पुनर्वासाभियानस्य अन्तर्गत वरिष्ठारिणः सीआरपीएफ इति बलस्य अधिकारिणां च समक्षम् आत्मसमर्पणं कॉतम्। तेनोक्तं यत् एते माओवादिनः पीपल्स लिबरेशन गुरिल्ला आर्मी (PLGA) बटालियन, इत्यस्य दक्षिण-

बस्तर-सम्भागस्य आंध्र ओडिशा सीमायां च सक्रियाः आसन्। सममेव इमे छत्तीसगढस्य अबूझमाड़, सुकमा जनपदयोः ओडिशायाश्च सीमवर्ति-क्षेत्रेषु हिंसायाः घटनासु सम्मिलिताः आसन्। आत्मसमर्पण-कर्तृभ्यः प्रत्येकं नक्सलवादिभ्यः पञ्चाशत् सहस्र-रूप्यकाणां साहाय्यं प्रदीयते। प्रशासनस्य नीतेः अनुसारं तेषां पुनर्वासो विधास्यते।

-------------------------------------------

दिल्ली-आरक्षिबलम्

दिल्ली-आरक्षिबलेन गतरात्रौ दिल्ल्यां रामलीला मैदान क्षेत्रं निकषा अवैधनिर्माणं विरुध्य विहिते प्रयासे प्रस्तरक्षेप-घटनायां पञ्च जनाः निगृहीताः। आरक्षिबलेन प्रकरणेस्मिन् प्राथमिकी अपि पञ्जीकृता। वार्ताहारैः सह वार्तालापं कुर्वन्, आरक्षिबलस्य उप-निदेशकः अवदत् यत् उच्चन्यायालयस्य निर्देशानुसारं देहली-नगरनिगमः ध्वंसम् अकरोत्। सः अवदत् यत् अस्यां घटनायां पञ्च आरक्षिणः अपि व्रणिताः।

-------------------------------------------

प्रधानमन्त्री सोमनाथपर्व

प्रधानमन्त्री नरेन्द्रमोदी रविवासरे गुजराते सोमनाथ-स्वाभिमान-पर्वणि सहभागं करिष्यति। अस्य पर्वणः अन्तर्गतं सोमनाथे आवर्षं कार्यक्रमाः आयोजयिष्यन्ते। सोमनाथे सञ्जातस्य प्रथमाक्रमणस्य अस्मिन् वर्षे सहस्रवर्षाणि पूर्णानि भविष्यन्ति।

-------------------------------------------

लोकतन्त्र-निर्वाचन-प्रबन्धन-सम्मेलनम्

अस्य मासस्य एकविंशति-दिनाङ्के नव-दिल्ल्याः भारत-मण्डपे त्रिदिवसीयं भारत-अन्तरराष्ट्रीय-लोकतन्त्र-निर्वाचन-प्रबन्धन-सम्मेलनम् आयोजिष्यते। एतत् सम्मेलनं भारत-निर्वाचन-आयोगस्य तत्त्वावधाने भारतीय-अन्तरराष्ट्रीय-लोकतन्त्र-निर्वाचन-प्रबन्धन-संस्था अन्तरराष्ट्रीय-लोकतन्त्र-निर्वाचन-सहायता-संस्थया सह संयुक्तरूपेण आयोज्यते। महानिदेशकः राकेश-वर्मा

अवदत् यत् सम्मेलनस्य विषयः "सर्व-समावेशी-शान्तिपूर्ण-स्थितिस्थापक-सुस्थिर-विश्वस्य कृते लोकतन्त्रम्" इति अस्ति, यस्मिन् निर्वाचन-प्रक्रियाः निर्वाचन-प्रबन्धन-सम्बद्धाः च विषया: चर्च्यन्ते।

---------------------------------------------

## इसरो

इसरो इति भारतीय-अन्तरिक्ष-अनुसन्धान-सङ्घटनम् अस्य मासस्य द्वादश दिनाङ्के PSLV-C62 इति अभियानस्य प्रक्षेपणं करिष्यति। सामाजिक-अन्तर्जाल-सन्देशे इस्रो संसूचितवान् यत् आन्ध्रप्रदेशस्य श्रीहरिकोटा-स्थितात् सतीश-धवन-स्पेस-केन्द्रात् प्रातः सप्तदशाधिक- दशवादने उपग्रहस्य प्रक्षेपणं भविष्यति। अस्य अभियानस्य मुख्यभारः भू-निरीक्षण-उपग्रहः, ई. ओ. एस.-एन-1 इति अस्ति, यः रक्षा-अनुसन्धान-विकास-सङ्घटनेन रणनीतिक-प्रयोजनार्थं विकसितः अभासित-उपग्रहः अस्ति। एतद् अभियानं विविधभारतीय-अन्ताराष्ट्रिय-उपयोक्तृभ्यः अष्टदश सह-यात्री-उपग्रहान् अपि वहति।

---------------------------------------------

## क्रिकेट्

आई सी सी इति अन्ताराष्ट्रिय-क्रिकेट्-परिषदा ऐषमः विंशतिं प्रतिविंशतिः विश्वचषक-स्पर्धायाः अन्यत्र आयोजन-सम्बद्धा बाङ्ग्लादेशस्य प्रार्थना निराकृता । बी सी सी आई इत्यनेन बाङ्ग्लादे-दलस्य पूर्णसुरक्षायाः आश्वासनं प्रदत्तम्। अन्ताराष्ट्रिय-क्रिकेट्-परिषदा प्रोक्तं यत् विश्वचषक-स्पर्धायाः स्थानान्तरणस्य किमपि स्पष्टं कारणं नास्ति। यद्यपि भारतीयक्रिकेट-नियामकाभिकरणेन अस्मिन् विषये आधिकारिक-पुष्टी-प्रकरणं प्रदातुं निराकृतवान्।

।। इति वार्ताः ।।